MEDHĀMANTHAN
MEDHĀMANTHAN 2026
ISSN : 3139-7840
A Premier Peer-Reviewed, Open-Access, Bimonthly, International Online Research Journal
Dedicated to the fields of Arts, Humanities and Social Sciences
Adhering to UGC Guidelines and Quality Mandates
Volume: 1, Issue: 2 (JUL - AUG) 2026

# The Culmination of Duty (*Kartavya-bodha*) in *Abhijñānaśākuntalam*: A Conceptual Analysis

## अभिज्ञानशाकुन्तले कर्तव्यबोधस्य पराकाष्ठा — एकं तात्त्विकमध्ययनम्

***Pradip Chakraborty***
*Invite lecturer, Dept. Of Sanskrit*
*Onda Thana Mahavidyalaya, Bankura, West Bengal, India.*
*Email: pradipch94@gmail.com*
*Page No: 73-77*

***Abstract:*** *Kālidāsa's Abhijñānaśākuntalam is an unparalleled masterpiece of Sanskrit literature, in which love, humanity, morality, and a profound sense of duty are harmoniously integrated. This article examines the ideal nature of duty-consciousness and its contemporary relevance as reflected in Abhijñānaśākuntalam. Particular attention is given to the conflicts and harmonies between personal desire and social, moral, and familial obligations as manifested through the actions, decisions, and inner struggles of the principal characters. The conflict between King Duṣyanta's royal duties and personal emotions, Śakuntalā's love, self-respect, and familial responsibilities, and Sage Kaṇva's harmonious reconciliation of paternal affection with the duties of the hermitage reveal different dimensions of duty-consciousness.*

*In the play, duty is not presented merely as an external social obligation; rather, it is closely associated with an individual's moral consciousness, self-restraint, sense of responsibility, and commitment to the greater good. Through the inner conflicts of his characters, Kālidāsa demonstrates that rising above personal desires and fulfilling one's duties with sincerity constitutes an important foundation of moral excellence in human life. From this perspective, the concept of duty presented in Abhijñānaśākuntalam remains highly relevant to contemporary society. The values of responsibility towards the individual, family, society, and state, together with morality, self-discipline, mutual respect, and human compassion, can offer meaningful guidance in addressing various challenges of modern life. Thus, Abhijñānaśākuntalam is not merely a timeless love story; it is also a profound philosophical and ethical text that embodies enduring ideals of duty, morality, and human values.*

***Keywords:*** *Duty-consciousness, Sense of Duty, Duty-bound Conduct, Morality, Rāja-dharma.*

अस्मिन् जगति अनेकानि सामाजिकसंस्थानानि कार्यरतानि सन्ति। तानि जनानां अधिकारविषये जागरूकतां सृजन्ति। अधिकारैः सह कर्तव्यानामपि महत्त्वं वर्तते। उत्तरदायित्वस्य विषये अपि विशेषं बलं दीयते। अन्यथा सामाजिकव्यवस्थायां अनेकाः समस्याः उत्पद्येरन्। समाजस्य समृद्धिः तु उत्तमनेतृत्वस्य हस्ते भवति। कालिदासः सार्वत्रिकः कविः आसीत्। भारतीयकाव्यजगति सः सर्वोच्चतारकत्वेन स्वीकृतः अस्ति। भावानाम् अभिव्यञ्जने तस्य काव्यं कोमलं मनोहरं च भवति। तस्य सृजनात्मकतया सः उच्चस्थानम् अर्जितवान्। कालिदासस्य 'अभिज्ञानशाकुन्तलम्' इति नाटकं व्यक्तेः इच्छायाः कर्तव्यस्य च संघर्षस्य नाटकीकरणम् अस्ति।

हिन्दुदर्शने मानवस्य पूर्णजीवनयापनाय चत्वारः पुरुषार्थाः विहिताः सन्ति। ते च—धर्मः, अर्थः, कामः, मोक्षश्च। धर्मः कर्तव्यस्य मार्गः, अर्थः धनसम्पादनम्, कामः इच्छानां पूर्तिः, मोक्षः च बन्धनात् मुक्तिः इति। एतेषां

चतुर्णां पुरुषार्थानां समन्वयेन मानवजीवनं पूर्णतां प्राप्नोति। एतेषु धर्मस्य विशेषं महत्त्वं वर्तते। धर्मानुसारम् अर्थस्य कामस्य च सेवनं कृत्वा अन्ते मोक्षः प्राप्तुं शक्यते।

प्राचीनभारतस्य सभ्यतायाः संस्कृतिश्च कलायाः च सम्यक् परिचयं ज्ञातुं संस्कृतभाषायाः साहित्यस्य प्रत्यक्षं परोक्षं च परिचयः सर्वथा आवश्यकः एव। साहित्यं मानवसमाजस्य समागमदर्पणमस्ति। मानवजीवनस्य सर्वाणि शुभाशुभानि सुखदुःखानि अस्मिन् दर्पणे प्रतिविम्बितानि सन्ति। यथा साहित्यं समाजात् विविधघटनानां रसात् पोषणं प्राप्नोति, तथैव साहित्यं समाजं भिन्नरूपेण प्रभावितं करोति। अतः समाजसाहित्यञ्च परस्परं परिपूरकं भवति। समाजस्य यथार्थतायाः एकलक्षणत्वेन

'अभिज्ञानशकुन्तलम्' इति पर्याप्तं श्रेयः अर्हति, तस्य विविधघटनानां समावेशः, विविधविषयाणां समागमः च नाटकं अन्तराष्ट्रीयतायाः चरमस्तरं उन्नतयति। महाकविकालिदासेन लिखितं 'अभिज्ञानशकुन्तलम्' इति नाटकं समाजस्य जीवन्तं प्रतिविम्वमस्ति। तेन लौकिकसमाजस्य विविधाः नियमाः सिद्धान्ताः कर्तव्यभावनाः च स्वलेखन्याः मायास्पर्शेन अतीव सम्यक् सजीवाः कृताः। समाजे निवसन् सर्वेः मानवाः तेषां कर्मभावेन कर्तव्यभावेन च परिचिताः भवन्ति। यतः कार्यं एकं विशेषं माध्यमं यत् समाजस्य मुख्यं चालकशक्तिः, अस्माभिः तत् न विस्मर्तव्यम्।

सामाजिकनियमेन आवद्धानां कन्यानां सदा पितुर्गृहे स्थातुं अधिकारः नास्ति। जन्मान्तरं पिता समग्रपरिवारश्च कन्या यावत् युवती न प्राप्नोति तावत् तस्य भरणपोषणं कुर्वन्ति। समुचितसमये प्राप्ते उपयुक्तपात्रे दत्वा पतिगृहं प्रेषयितुं कुलस्य आगामिकर्तव्यं भवति। अस्मिन् सन्दर्भे अनुसूयायाः वचनं प्रामाण्यम्—

"गुणवते कन्यका प्रतिपादनीयेत्ययं तातस्य तावत् प्रथमः सङ्कल्पः"[१]

परन्तु आश्चर्य्यं यत् वाल्यकालात् ब्रह्मचारी सन् अयं पुरुषः वनवासि-जीवनं यापयति परन्तु अस्मिन् जन्मे सः स्वकन्यां प्रति पितुर्कर्तव्यं न विस्मृतवान्। सः स्वपुत्रीं स्मारयतिस्म यत्- लौकिकलोके पितुः किं कर्तव्यम्— कन्या खलु परं धनम्, अद्य तां कन्यां स्वगृहं प्रेषयित्वा मम मनसि संगृहीतस्य अस्य निधेः स्वामिने समर्पयामि।

"अर्थो हि कन्या परकीय एव
तामद्य संप्रेष्य परिग्रहीतुः।
जातो ममायं विशदः प्रकामं
प्रत्यर्पितन्यास इवान्तरात्मा"।।[२]

महर्षिकण्वः ईदृशस्य नैष्ठिकब्रह्मचारिणः मुखे एतादृशः लौकिकः संसारोचितोपदेशाश्च कथं प्रकाश्यते? अस्मिन् विषये प्रश्नाः स्युः। अतः पाठकानां मनसान्त्वनार्थं महाकविकालिदासः काश्यपं स्वयमेव वाध्यं कृतवान् यत्–

"वनौकसौऽपि वयं लौकिकज्ञा एव"।[३]

देशस्य कालस्य कर्तव्यनिष्ठायाः उत्तरदायित्वस्य च दृष्टा स्नेहशीलपितारूपेण प्रथमविवाहविषये स्वकन्यां प्रति उपदेशं वस्तुतः उचितमस्ति। गृहपितुः पालकपितृत्वेन यमुपदेशं दत्तं तत् यथार्थरुपेण प्रशंसनीयः अतुलनीयैव। सेवापरायनता मित्रवत् पतिभक्तिः, भर्तुः भिन्नावस्थायां अपि वैरभावं न कर्तव्यं, स्वजनभृत्येषु च दया प्रजाः प्रति विनयशीलश्च भवेत्।

"शुश्रूषस्व गुरुन् कुरु प्रियसखीवृत्तिं सपत्नीजने
भर्तुर्विप्रकृतापि रोषणतया मास्म प्रतीपं गमः।
भूयिष्ठं भव दक्षिणा परिजने भाग्येष्वनुसेकिनी
यान्तेव गृहिणीपदं युवतयो वामाः कुलस्याधयः"।।[४]

अस्य युगस्य परिवेशे महर्षेः शकुन्तलां प्रति प्रदत्तमुपदेशावली सनातनं सार्वत्रिकं च द्रष्टव्यं वर्तन्ते; यत् वर्तमाने नारीसमाजस्य किमपि मूल्यमस्ति वेति? महर्षिः तस्य कन्या प्रसङ्गेन यत् सत्यमुद्घाटितवान् तत् सर्वदेशानां, समाजस्य सर्वेषां युगानां स्तरानां च कृते अप्रमेयम्, सार्वत्र्यिकं चेति शाश्वतम्। यतः महर्षिणा स्वकन्यां विषये यत् सत्यं उक्तं तत् सर्वेषु देशेषु सर्वकालिकवधूषु जीवनेषु सदा प्रयोज्याः सन्ति। महाकवेः अरण्ये वर्धमानं प्रत्येकं वृक्षं सम्यक् अप्रयत्नेन शकुन्तलया सह संयोजति; फलतः तेषां कर्तव्यानि मूल्यानि च नाटके प्रतिफलन्ति । यथा शकुन्तला तपस्वीकन्या, अथ तपोवने निवसति, सा तेषु अन्यतमा अस्ति। अतः शकुन्तलायाः पतिगृहगमनात् प्राक् महर्षिकण्वः सर्वेभ्यः वृक्षेभ्यः अनुमतिं गृहीतवान् फलतः अत्रैव सः महिमामण्डितः अभवत्। मनुष्यस्य चेतनस्वभावः सर्वेभ्यः तपोवनवृक्षेभ्यः च अचेतनवस्तुत्वेन अनुज्ञां दत्तः, न तु मनुष्यानां चेतनस्वभावः सर्वदा कर्तव्यस्य उर्ध्वतायां बद्धो भवति, परन्तु कविकालिदासः अत्र चेतनाचेतनेषु पार्थक्यं न कृतवान्, अत्रैव महाकवेः सार्थकता।

"पातुं न प्रथमं व्यवस्यति जलं युष्मास्वपीतेषु या,

MEDHĀMANTHAN ISSN : 3139-7840
A Premier Peer-Reviewed, Open-Access, Bimonthly, International Online Research Journal
Dedicated to the fields of Arts, Humanities and Social Sciences
Adhering to UGC Guidelines and Quality Mandates
Volume: 1, Issue: 2 (JUL - AUG) 2026

नादत्ते प्रिय मण्डनापि भवतां स्नेहेन या पल्लवम् ।
आद्ये वः कुसुमुप्रसूतिसमये यस्या भवत्युत्सवः,
सेयं याति शकुन्तला पति-गृहं सर्वैरनुज्ञायताम्"।।[५]

शकुन्तलायाः पतिगृहयात्रायाः दृश्ये महर्षिकण्वस्य यत् परिचयः वयं पश्यामः तदेव स अस्माकं समाजस्य अपारं प्रेम्नः कर्तव्यनिष्ठः परोपकारी च पिता इत्यन्यत् किमपि न चिन्तयितुं शक्नुमः। पालिताकन्यायाः पतिगृहं गच्छती पितृविग्रहप्रवृत्तिभिः दुलति न शक्नोति। तस्य नेत्रानि अश्रुपूर्णानि भवन्ति, स्वरगलितः भवति, कन्यायाः आसन्न प्रस्थानेन साभिभूतः भवतीति। कुतः-

"यास्यत्यद्य शकुन्तलेति हृदयं संस्पृष्टमुत्कण्ठया,
कण्ठः स्तम्भितवाष्पवृत्तिकलुषश्चिन्ताजडं दर्शनम्।
वैक्लव्यं मम तावदीदृशमिदं स्नेहादरण्यौकसः,
पीड्यन्ते गृहिणः कथं नु तनयाविश्लेषदुःखैर्नवैः"।।[६]

सा शकुन्तला इदानीं पतिं मिलितुं राजधानीं गच्छति, यस्य क्षणिकसंयोगस्य स्मृतिः सा तदा स्वशरीरे मनसि च वहति। परन्तु तदपि आश्रमात् निर्गत्य जीवनस्य योगसूत्रविच्छिन्नतुं दुःखम् अनुभवतिस्म। न केवलं तपोवनात्यक्ता गमनस्य पीडामनुभवति स्म। अपि तु तपोवनस्य सम्पूर्णं अरण्यराजम् अनुभवतिस्म,

जैवमण्डले सर्वे दुःखेन व्याकुलाः सन्ति शकुन्तलायाः प्रस्थानम्। मानवसमाजेन सह अचेतनजीवानां अद्भुतः आध्यात्मिकः योगसूत्रः स्थापनं करोति महाकविना। एकस्य मनुष्यस्याभावे दुःखं व्यञ्जयन् आध्यात्मिकयोग इव। महाकविःअचेतनसमाजस्य अद्भुतं वन्धनं चेतनसमाजं प्रति कल्पनालोकात् आदाय यथार्थसन्दर्भे आनयति। सर्वः प्रकृतिः शकुन्तलायाः शोकेन मुह्यमानाः तस्याः विदायं कृतवान्। अत्र प्रकृतेः कर्तव्यबोधः तथा च सम्पूर्णसमाजः शकुन्तलां प्रति प्रकटितः भवति।

"उद्गलितदर्भकवला मुग्यः परित्यक्तनर्तना मयूराः।
अपसृतपाण्डुपत्रा मुञ्चन्त्यश्रूणीव लताः"।।[७]

मानवस्वभावस्य मूर्तरूपं क्रान्तदर्शी महाकविकालिदासमतेण प्रकृतिं विना मानवसमाजः कदापि न जीवितुं शक्नोति। मानवसमाजः प्रकृतिश्च परस्परं सुखदुःखभागिनः बान्धव इव सन्ति। शकुन्तला एव अस्य तपोवनस्य अवयवं तुल्यचरित्रं अत्र निवसन्, सा परस्परं वन्धुत्वस्य आकर्षणं अनुभवति। न आत्मानां चेतनस्याचेतनस्य च भेदस्य आवश्यकता अत्र वर्तते। सुखमाधुर्यपूर्णे स्वर्गे सर्वे जीवन्ति। वनपशुभिः सह अद्भूतः आत्मीयता मित्रता च हृदयस्पर्शी पाठकानां हृदयानि उद्वेलितानि करोन्ति।

स्वल्पवयसा लतायां एव जलं दत्वा तस्य वनज्योत्स्ना इति नामकरणं कृत्वा, मृगशिशुं मातृप्रेमं स्नेहं च दत्तवती। एषः अद्भूतः कर्तव्यः करुणाभावः यस्य परिणामः कोऽपि किमपि न अपेक्षते। शैशवे ईङ्गुदीतैलेन ताडितत्वात् एव अद्य सा शकुन्तलायाः कण्ठमाकृष्य स्वस्वामीरालयं गन्तुं निषेधं करोति। शकुन्तलायाः आसन्नहानिकारणात् सर्वे निकटवन्धुवत् व्यवहारं कुर्वन्ति।

"यस्य त्वया व्रणविरोपणमिङ्गुदीनां
तैलं न्यषिच्यत मुखे कुशसूचिविद्धे
श्यामाकमुष्टिपरिवर्धितको जहाति
सोऽयं न पुत्रकृतकः पदवीं मृगस्ते"॥[८]

भगवानइन्द्रस्य आह्वानस्य प्रतिक्रियां दत्वा, स्वर्गात् प्रत्यागमनकाले राजा दुष्यन्तः हेमकूटपर्वते महर्षिकश्यपं दृष्ट्वा ऋषिभ्यः नमस्कारं कर्तुं आश्रमम् आगतः। आश्रमं गच्छन् राजा एकं अद्भूतं सुन्दरं मानववालकं सिंहशिशुना सह क्रीडितुं दृष्टवान्। तं वालकं दृष्ट्वा राजा दुष्यन्तः तस्मै प्रीतिमभूय सद्य। सः चिन्तितवान् यत् कदाचित् सः अजन्मत्वात् एतादृशी अवस्था

MEDHĀMANTHAN ISSN : 3139-7840
A Premier Peer-Reviewed, Open-Access, Bimonthly, International Online Research Journal
Dedicated to the fields of Arts, Humanities and Social Sciences
Adhering to UGC Guidelines and Quality Mandates
Volume: 1, Issue: 2 (JUL - AUG) 2026

अस्ति। वालकस्य कमलसदृशं हस्तं दृष्ट्वा 'राजचक्रवर्त्तीः' उक्तं चिह्नं दृष्टवान्। सिंहशावकात् वालकम् उत्सुकतया मुक्तं कुर्वन् तस्य सर्वं शरीरं स्फुरति स्म। फलतः सः परिचारिकां तापसीं पृष्ठवान् यत् सा का राजर्षेः पत्नी अस्ति इति ज्ञातुम्। यथा वालकः सिंहशावकात् विच्छिन्नः अभवत् तथा तस्य रक्षकः स्खलितः। मुनिदत्तस्य अस्य रक्षावन्धनस्य चमत्कारिकगुणः सन्ति, यदि वालकः मातृव्यतिरिक्तेन केनापि स्पृष्टः भवति तर्हि सर्पः परिणमति दंशति च। परन्तु यथा संकटः नासीत्, तस्मात् परिचारकः तं दुष्यन्तं ज्ञातुं समर्थः अभवत्। अन्ते च पिता पुत्रेण सह मिलति। यथा कथ्यते, पितृपुत्रयोः सम्वन्धः केनापि कारणेन आच्छादयितुं न शक्यते – वाधकः कठिनः दुर्गमः च मार्गः प्रकाशितः भविष्यति। एषः एव पितृपुत्रसङ्गतिः अग्रिमनाटकस्य मुख्यकथायाः विस्तारे सहायकः भवति।

"प्रलोभ्यवस्तुप्रणयप्रसारितो विभाति जालग्रथिताङ्गुलिः करः।
अलक्ष्यपत्रान्तरमिद्धरागया नवोषसा भिन्नमिवैकपङ्कजम्"।।[९]

महाकवि नाटकस्य षष्ठस्य खण्डस्य प्रारम्भात् पूर्वरङ्गिनः गहनकथाप्रवेशस्य परिचयं कृत्वा नाटकस्य मन्दगतिं सजीवं करोति। तत्कालीनस्य भारतीयसमाजस्य विविधानि तथ्यानि उक्तदृश्ये प्रकाशितानि सन्ति, तत्कालीनप्रशासनिकन्यायव्यवस्थायाः केचन न्यायसूचना प्राप्तुं शक्यते, तत्कालं तत्युगस्य सामाजिकस्थितेः सुन्दरं चित्रं च उद्धृतमस्ति। धीवर-प्रभृतीनां श्रेणीनां निर्धनवर्गैव स्थितिः तत्रकालीनसमये। परन्तु धीवरस्य कथनात् इदं प्रतीयते यत् जनानां मध्ये श्रमस्य गौरवस्य जातीयविद्वत्तायाः च भावः आसीत्। यज्ञे पशुवलिः न निन्दनीयः इति च गम्यते। अस्मिन् कालिदासस्य युगे ब्राह्मणधर्मस्य प्रधानता आसीत्, न तु बौद्धधर्मः इति अवगन्तुं शक्यन्ते। रक्षा अर्थात् न्यायपालिका तेषु दिनेषु अत्याचारी भ्रष्टा चेति ज्ञायते। शङ्कितः ते धीवरस्य दरिद्रस्य पुरुषस्य ताडनं कृत्वा मान्यतां प्राप्तुं प्रयतन्ते। दरिद्रत्वेन तस्य अवसरः नासीत् इव। न्यायिकसमर्थनव्यवस्था अपि तस्य विना संगठिता इव दृश्यते इति निष्पन्नम्। भ्रष्टाचारस्य प्रमाणानि सन्ति, रक्षका नगरपालः अपि त्वडितं किं गृहीत्वा मद्यस्य व्यसनं कृतवान्। दत्तव्यवस्था अत्यन्तं कठोरः आसीदिति क्षुद्रचौर्यरपराधस्य गुरिमृत्युदण्डात् द्रष्टुं शक्यते। अतः वयं जानीमः यत् महाकविकालिदासः यागयज्ञः पशुबधविरोधी बौद्धः नासीत्, अपि तु सः सनातनब्राह्मणधर्मस्य भक्तः सेवकः, धारकः वाहकश्चेति आसीत्। सः असाधारणप्रतिभया अधिकारी आसीत्। तथा च एकस्मिन् लघुदृश्ये तस्य युगस्य अद्भुतं सामाजिकं चित्रं उद्धृतमस्ति।

"सहजं किल यद्विनिन्दितं न खलु तत् कर्म विवर्जनीयम्।
पशुमारणकर्मदारुणोऽनुकम्पामृदुरेव श्रोत्रियः"।।[१०]

जीवनात् प्रियतमेन भर्त्रा महाराज्ञा दुष्यन्तेन तिरस्कृता विरहविधूरश्च शकुन्तला इदानीं कश्यपमारीचस्य आश्रमे आश्रितास्ति, सा इदानीं धूसरकेशः तपः कृते कृशानना, एकवेणीधरा पतिव्रता देवानां शुद्धकर्मचारिणीरूपेण वयं प्रत्यक्षरूपेण पश्यामः।

"वसने परिधूसरे वसाना नियमक्षाममुखी धृतैकवेणिः।
अतिनिष्करुणस्य शुद्धशीला मम दीर्घं विरहव्रतं विभर्ति"।। [११]

शकुन्तला दुष्यन्तेन द्विवारं मिलितवती, एकवारं महर्षिकण्वाश्रमे द्वितीये तु भगवानमारीचस्याश्रमे। यत्र मार्गे निरोधाः विघ्नाश्च सन्ति, पदे पदे स्खलनं इन्द्रियाणां समायोजनं च भवति। भगवानमारीचस्याश्रमः धर्मपरायणतायाः मूर्तरूपः अस्ति भक्तिः, तत्र वैराग्यः संयमः इन्द्रियनिग्रहः इति मुख्यः। कामजः प्रेमं स्वर्गं प्रति उन्नयनार्थं एतत् पवित्रतीर्थस्थानां चिनोति स्म। शास्त्रेषु प्रत्ययः श्रद्धा इत्युच्यते, यज्ञानुष्ठानाय योग्यं धनं वित्तं, अपरतः शास्त्रकर्मानुष्ठानं विधिः कथ्यते, कस्यापि यज्ञस्य करणाय श्रद्धां वित्तं, विधिः त्रीणि अपि आवश्यकानि। दुष्यन्तः शकुन्तलायाः प्रेम यज्ञफलवत् शुद्धम्। ते च तस्य यज्ञस्य उपकरणानि यथा गृहे गृहकार्यं पतिपत्न्या बालकैः सह क्रियन्ते। अत एव भगवान् मारीचः तान् एकत्र दृष्ट्वा एवम् उक्तवान्।

"दिष्ट्या शकुन्तला साध्वी सदपत्यमिदं भवान् ।
श्रद्धा वित्तं विधिश्चेति त्रितयं तत्समागतम्"।।[१२]

MEDHĀMANTHAN ISSN : 3139-7840
A Premier Peer-Reviewed, Open-Access, Bimonthly, International Online Research Journal
Dedicated to the fields of Arts, Humanities and Social Sciences
Adhering to UGC Guidelines and Quality Mandates
Volume: 1, Issue: 2 (JUL - AUG) 2026

नाटकस्य इष्टलक्ष्यप्राप्तुं शिशुसर्वदमनस्य कार्यं सर्वथा आवश्यकम् अस्ति। कालिदासस्य नेत्रग्राहकसुन्दरबिम्बानां प्रकाशनार्थं तथा च नाटकस्य सफलपरिणामस्य कृते एते सर्वे महाकाव्याः अनिवार्याः इति अत्र न संशयः। अतः कर्तव्यं मनुष्याणां कृते अनिवार्यम्। द्रष्टारः अपि तथैव उच्चारयन्ति। वैदिकमन्त्रेषु वयं पश्यामः प्राथमिकता न भाग्यस्य, अपितु निरन्तरप्रयत्नस्य। ऋग्वेदः वदति "देवता केवलं तान् आशीर्वादं ददति ये स्वप्रयत्नः कुर्वन्ति न च कुर्वन्ति स्वप्नमात्रं ये"। संस्कृतनियमानुसारं द्वितीयम् (सुन्वन्तर) यथा अत्र प्रयुक्तः इति विशेषार्थः। प्रयासः निष्ठावान् निष्कपटः च भवतु। इच्छन्तान्ता धर्मः श्रवण स्वप्न आत्मा। (ऋ.वे. ८-२-१८)

## Endnotes

१. अभिज्ञानशकुन्तलम्, अनिलचन्द्रवसुः, चतुर्थाङ्कः विष्कम्भकः पृष्ठासंख्या- २५२
२. अभिज्ञानशकुन्तलम्, अनिलचन्द्रवसुः, चतुर्थाङ्कः, श्लोकसंख्या-२२ पृष्ठासंख्या-३१४
३. अभिज्ञानशकुन्तलम्, अनिलचन्द्रवसुः, चतुर्थाङ्कः, पृष्ठासंख्या-३१२
४. अभिज्ञानशकुन्तलम्, अनिलचन्द्रवसुः, चतुर्थाङ्कः, श्लोकसंख्या-१८, पृष्ठासंख्या- ३१३
५. अभिज्ञानशकुन्तलम्, अनिलचन्द्रवसुः, चतुर्थाङ्कः, श्लोकसंख्या-९ , पृष्ठासंख्या- २९२
६. अभिज्ञानशकुन्तलम्, अनिलचन्द्रवसुः, चतूर्थाङ्क, श्लोकसंख्या-६, पृष्ठासंख्या-२८६
७. अभिज्ञानशकुन्तलम्, अनिलचन्द्रवसुः, चतुर्थाङ्क , श्लोकसंख्या-१२, पृष्ठासंख्या-२९९
८. अभिज्ञानशकुन्तलम्, अनिलचन्द्रवसुः, चतुर्थाङ्क श्लोकसंख्या-१४, पृष्ठासंख्या-३०३
९. अभिज्ञानशकुन्तलम्, अनिलचन्द्रवसुः, सप्तमाङ्क , श्लोकसंख्या-१६, पृष्ठासंख्या-५६०
१०. अभिज्ञानशकुन्तलम्, अनिलचन्द्रवसुः, षष्ठाङ्कः प्रवेशकः , श्लोकसंख्या-१, पृष्ठासंख्या-४२१
११. अभिज्ञानशकुन्तलम्, अनिलचन्द्रवसुः, सप्तमाङ्क , श्लोकसंख्या-२१, पृष्ठासंख्या-५७५
१२. अभिज्ञानशकुन्तलम्, अनिलचन्द्रवसुः, सप्तमाङ्क , श्लोकसंख्या-२९, पृष्ठासंख्या-५९२

## Bibliography


- Bandyopadhyay, A. K. (n.d.). Manusamhita. Sadesh.
- Basu, A. C. (n.d.). Arthashastram. Sanskrit Book Depot.
- Chakrabarti, S. N. (1976). Abhijñānaśākuntalam. Sahityaratna Prakashan.
- Chatterjee, A. C. (1941). Kalidasa: His poetry and mind.
- Das, D. K. (n.d.). Sanskrit sahityer itihas. Sadesh.
- Max Müller, F. (n.d.). A history of ancient Sanskrit literature.
- Sastri, G. (n.d.). A concise history of classical Sanskrit literature.
- Singh, A. (1977). Kalidasa: A critical study.
- Vidyasagar, I. C. (1946). Abhijñānaśākuntalam. Kolkata.
- Warder, A. K. (n.d.). Indian Kāvya literature (Vols. 1–7).
- Weber, A. (n.d.). The history of Indian literature.
- Siddhāntavāgīśa, H. (1330). Abhijñānaśākuntalam. Kolkata.
- Bidyaratna, K. (1932). Abhijñānaśākuntalam. Kolkata.